भज गोविन्दम्

भज गोविन्दं भज गोविन्दं गोविन्दं भज मूढमते ।

सम्प्राप्ते सन्निहिते काले नहि नहि रक्षति डुकृञ् करणे ॥ १ ॥

मूढ जहीहि धनागमतृष्णां कुरु सद्बुद्धिम् मनसि वितृष्णाम् ।

यल्लभसे निजकर्मोपात्तं वित्तम् तेन विनोदय चित्तम् ॥ २ ॥

नारीस्तनभरनाभीदेशं दृष्ट्वा मा गा मोहावेशम् ।

एतन् मांसवसादिविकारं मनसि विचिन्तय वारं वारम् ॥ ३ ॥

नलिनीदलगतजलम् अतितरलं तद्वज्जीवितम् अतिशयचपलम् ।

विद्धि व्याध्यभिमानग्रस्तम् लोकं शोकहतं च समस्तम् ॥ ४ ॥

यावद् वित्तोपार्जनशक्तः तावन्निजपरिवारो रक्तः ।

पश्चाज्जीवति जर्जरदेहे वार्त्तां कोपि न पृच्छति गेहे ॥ ५ ॥

यावत् पवनो निवसति देहे तावत् पृच्छति कुशलं गेहे ।

गतवति वायौ देहापाये भार्या बिभ्यति तस्मिन् काये ॥ ६ ॥

बालस्तावत् क्रीडासक्तः तरुणस्तावत् तरुणीसक्तः ।

वृद्धस्तावत् चिन्तासक्तः परमे ब्रह्मणि कोपि न सक्तः ॥ ७ ॥

का ते कान्ता कस्ते पुत्रः संसारोयम् अतीव विचित्रः ।

कस्य त्वम् कः कुत आयातः तत्त्वं चिन्तय तदिह भ्रातः ॥ ८ ॥

सत्सङ्गत्वे निस्सङ्गत्वं निस्सङ्गत्वे निर्मोहत्वम् ।

निर्मोहत्वे निश्चलितत्वं निश्चलितत्वे जीवन्मुक्तिः ॥ ९ ॥

वयसि गते कः कामविकारः शुष्के नेरे कः कासारः

क्षीणे वित्ते कः परिवारः ज्ञाते तत्त्वे कः संसारः ॥ १० ॥

मा कुरु धनजनयौवनगर्वं हरति निमेषात् कालस्सर्वम् ।

मायामयम् इदम् अखिलं हित्वा ब्रह्मपदं त्वम् प्रविश विदित्वा ॥ ११ ॥

दिनयामिन्यौ सायं प्रातः शिशिरवसन्तौ पुनरायतः ।

कालः क्रीडति गच्छत्यायुः तदपि न मुञ्चत्याशावायुः । १२ ॥

का ते कान्ता धनगतचिन्ता वातुल किं तव नास्ति नियन्ता ।

त्रिजगति सज्जनसङ्गतिरेका भवति भवार्णवतरणे नौका । १३ ॥

जटिलो मुण्डी लुञ्चितकेशः काषायाम्बरबहुकृतवेषः ।

पश्यन्नपि च न पश्यति मूढो ह्युदरनिमित्तं बहुकृतवेषः ॥ १४ ॥

अङ्गं गलितं पलितं मुण्डं दशनविहीनं जातं तुण्डम् ।

वृद्धो याति गृहीत्वा दण्डं तदपि मुञ्चत्याशापिण्डम् ॥ १५ ॥

अग्रे वह्निः पृष्टे भानुः रात्रौ चुबुकसमर्पितजानुः ।

करतलभिक्षस्तरुतलवासः तदपि न मुञ्चत्याशापाशः ॥ १६ ॥

कुरुते गङ्गासागरगमनं व्रतपरिपालनम् अथवा दानम् ।

ज्ञानविहिनः सर्वमतेन मुक्तिं न भजति जन्मशतेन ॥ १८ ॥

सुरमन्दिरतरुमूलनिवासः शय्या भूतलम् अजिनं वासः ।

सर्वपरिग्रहभोगत्यागः कस्य सुखं न करोति विरागः ॥ १८ ॥

योगरतो वा भोगरतो वा सङ्गरतो वा सङ्गविहिनः ।
यस्य ब्रह्मणि रमते चित्तम् नन्दति नन्दति नन्दत्येव ॥ १९ ॥
भगवद्गीता किञ्चिदधीता गङ्गाजललवकणिका पीता ।
सकृदपि येन मुरारि समर्चा क्रियते तस्य यमेन न चर्चा ॥ २० ॥
पुनरपि जननं पुनरपि मरणं पुनरपि जननीजठरे शयनम् ।
इह संसारे बहुदुस्तारे क्रिपयाऽपारे पाहि मुरारे ॥ २१ ॥
रथ्याचर्पटविरचितकन्थः पुण्यापुण्यविवर्जितपन्थः ।
योगी योगनियोजितचित्तो रमते बालोन्मत्तवदेव ॥ २२ ॥
कस्त्वम् कोऽहम् कुत आयातः का मे जननी को मे तातः ।
इति परिभावय सर्वम् असारं विश्वं त्यक्त्वा स्वप्नविचारम् ॥ २३ ॥
त्वयि मयि चान्यत्रैको विष्णुः व्यर्थं कुप्यसि मय्यसहिष्णुः ।
सर्वस्मिन्नपि पश्यात्मानं सर्वत्रोत्सृज भेदाज्ञानम् ॥ २४ ॥
शत्रौ मित्रे पुत्रे बन्धौ मा कुरु यत्नं विग्रहसन्धौ ।
भव समचित्तः सर्वत्र त्वं वाञ्छस्यचिराद् यदि विष्णुत्वम् ॥ २५ ॥
कामं क्रोधम् लोभं मोहम् त्यक्त्वात्मानं भावय कोऽहम् ।
आत्मज्ञानविहीना मूढाः ते पच्यन्ते नरकनिगूढाः ॥ २६ ॥
गेयं गीतानामसहस्रं ध्येयम् श्रीपतिरूपम् अजस्रम् ।
नेयम् सज्जनसङ्गे चित्तं देयम् दीनजनाय च वित्तम् ॥ २७ ॥

सुखतः क्रियते रामाभोगः पश्चाद्धन्त शरीरे रोगः ।

यद्यपि लोके मरणं शरणं तदपि न मुञ्चति पापाचरणम् ॥ २८ ॥

अर्थम् अनर्थं भावय नित्यं नास्ति ततस्सुखलेशस्सत्यम् ।

पुत्रादपि धनभाजां भीतिः सर्वत्रैषा विहिता रीतिः ॥ २९ ॥

प्राणायामं प्रत्याहारं नित्यानित्यविवेकविचारं ।

जाप्यसमेतसमाधिविधानं कुर्ववधानं महदवधानम् ॥ ३० ॥

गुरुचरणाम्बुजनिर्भरभक्तः संसाराद् अचिरात्भव मुक्तः ।

सेन्द्रियमानसनियमाद् एवम् द्रक्ष्यसि निजहृदयस्थं देवम् ॥ ३१ ॥